# एककम् - 1

# १.१ तव विरहे.... ।

**पठनाधिगमाः ।**

1. गीतम् आलपति।
2. गीतं श्रृणोति।
3. क्रियाविशेषणानां पट्टिकां करोति।
4. आशयमधिकृत्य टिप्पणीं लिखति।
5. प्रस्तुताप्रस्तुतानि पट्टिकारूपेण लिखति।
6. आस्वादनटीकां लिखति।

## 1.1 प्रवेशिका

पाठपुस्तकान्तर्गताः श्लोकाः अध्यापकेन पठ्यन्ते।

तेषामाशयमपि विवृणोति।

> **आशयः** :- चूतपुष्पं कामदेवस्य बाणेष्वन्यतमं भवति। कामदहनानन्तरं तत्पुष्पं दृष्ट्वा रतीदेवी एवं विलपति। हरितवर्णेन एवं अरुणवर्णेन च बद्धं, पुंस्कोकिलानां कूजितैः सूचितं माकन्दकिसलयं इतः परं कस्य बाणतां गमिष्यति इति।

तदनन्तरं अस्मिञ्छ्लोके कविप्रतिपादिताः प्रकृत्यंशाः कान् कान् धर्मान् निर्वहन्ति? एवं छात्रपरिचितेषु अन्येषु श्लोकेषु अपि विद्यमानाः प्रकृत्यंशाः कान् कान् धर्मान् निर्वहन्ति इति विषये छात्राः चर्चां कुर्वन्ति।

चर्चासूचिकाः - सहानुभूतिः, परस्परस्नेहः, प्रकृत्यादरः, तादात्म्यभावना।

द्वित्राः छात्राः चर्चान्तर्गतकार्याणि अवतारयन्ति। मानुषिकभावानां स्वाभाविकवर्णनायै। एवं प्रकृतिमनुष्ययोः उभयोः भावानां परस्परपूरकत्वमपि व्यञ्जयितुम् एव कविः दत्तावधानः इति क्रोडीकरोति।

## 1.2 श्रवणप्रक्रिया।

कक्ष्यायाम् अष्टपदीं श्रावयितुम् अध्यापकेन प्रयत्नः करणीयः। तत्र अन्तर्जाले अष्टपद्याः बहुविधावतारणशैल्यः उपलभ्यन्ते। चलच्चित्ररूपं ततः स्वीकृत्य कक्ष्यायाम् अवतारयतु। नृत्ताविष्कारस्यापि उपाधिरूपेण (माध्यमत्वेन) छात्राणाम् अवधानतया श्रवणदर्शनावसरं ददातु।

1.3 गीतश्रवणानन्तरं एकः छात्रः गीतमिदमालपतु। अध्यापकः छात्रान् संघान् कृत्वा गीतालपनाय प्रेरयति। छात्राः संघशः, संघादेको वा आगत्य गीतमालपतु। अत्र अधिसंघमूल्यनिर्णयाय अवसरः भवेत्।

1.4 छात्राः संघे स्थित्वा पाठभागं सम्यक् वाचयन्तु। पाठभागस्य सन्धियुक्तपदानि सञ्चित्य पुस्तकसाहाय्येन विश्लेषणं कुर्वन्तु। उच्चैः वाचयन्तु, टिप्पणीपुस्तके लिखन्तु च। नूतनपदानि तदर्थान् च अवगत्य प्रवर्तनपुस्तिकायां संयोजयन्तु। अध्यापकेन मूल्यनिर्णयः कार्यः।

मूल्यनिर्णयसुचिकाः - अर्थबोधः, उचितः पदच्छेदः, पारायणसौकुमार्यम्।

**1.5 क्रियाविशेषणचयनम्।**

| **पाठभागः** | **क्रियाविशेषणम्** |
|---|---|
| 1. पश्यति विषमिव वपुषि सशङ्कम्। | सशङ्कम् |
| 2. मदनदहनमिव वहति सदाहम्। | सदाहम् |
| 3. हरिरिति हरिरिति जपति सकामम्। | सकामम् |

अध्यापकः पाठभागस्थान् कांश्चन अंशान् प्रदत्तरूपेण पट्टिकायां विलिख्य प्रदर्शयतु। तेषु विद्यमानानि क्रियापदानि विशेषणपदानि च अधिकृत्य चर्चां कृत्वा अवतारयतु, पट्टिकायां सन्निवेशयतु च।

अनन्तरम् अध्यापकः कानिचन क्रियाविशेषणानि लिखति।

उदाः- सहर्षं, सधैर्यं, सस्नेहं, सविस्तरं, सादरं, सामोदं, सदयं, समूलम्। छात्राः तानि क्रिया - विशेषणानि उपयुज्य चत्वारि पञ्च वा वाक्यानि निर्मान्तु।

**एकैकम् उदाहरणम् :-**

सहर्षम् - चतुरङ्गक्रीडां जित्वा आगच्छन्तं हरिकृष्णं सतीर्थ्याः सहर्षं स्वीकृतवन्तः।

सधैर्यम् - वाप्यां पतितं स्वसुहृदं रक्षितुं मुनीरः सधैर्यं जले उदप्लवत्।

सस्नेहम् - पुत्र्याः विवाहदिने गृहमागतान् बान्धवान् गृहनाथः सस्नेहं स्वीचकार।

सविस्तरम् - गीतासत्रे चिदानन्दपुरीस्वामिनः प्रभाषणे गीतारहस्यं सविस्तरं प्रत्यपादयत्।

सादरम् - ग्रामात् विद्यालयं गन्तुं सौकर्यार्थं नद्यां सेतुनिर्माणाय ग्राममुख्यः सचिवं सादरम् अब्रवीत्।

सामोदम् - सामाजपरिष्करणे नारायणगुरुदेवस्य सम्भावनां जनाः सामोदं चिन्तयन्ति।

सदयम् - सर्वकारः ग्रामे नूतनं चिकित्सालयं आरब्धुं सदयं निश्चिकाय।

समूलम् - केरलेषु पञ्चवर्षाभ्यन्तरे विद्यालयीया पाठ्यपद्धतिः समूलं परिष्क्रियते।

## 1.6 प्रकृतिसम्बन्धिनाम् अंशानां पट्टिकाकारणम्।

पाठभागे परामृष्टानां प्रकृत्यंशपदानां चयनं कृत्वा प्रक्रियापुस्तिकायां लिखतु। तानि अधिकृत्य कक्ष्यायां चर्चां चालयतु। चर्चासूचिकाः :- प्रकृत्यंशः, प्रकटीयमानाः मानसिक व्यापाराः, तेषां औचित्यम्। अध्यापकमूल्यनिर्णयः।

**मूल्यनिर्णयसूचिकाः :-** भागभागित्वम्, आशयप्रकटनम्।

## 1.7 प्रस्तुताप्रस्तुतानां वर्गीकरणम्।

छात्राः पाठं पठन्ति। तदनन्तरं तैः पाठभागे प्रस्तुतानि वस्तूनि प्रवर्तनपुस्तिकायां लिख्यन्ताम्। तेषां वाचनानन्तरम् अध्यापकः प्रवर्तनपुटानि प्रददाति। तत्र विद्यमानानां प्रस्तुतानां युक्तानि अप्रस्तुतानि पाठभागात् उद्धृत्य लेखनीयानि। तदनन्तरं द्वित्राः छात्राः तानि पठन्ति। अत्र स्वयं मूल्यनिर्णयः कार्यः।

**यथा :-**

| | | |
|---|---|---|
| आवासः | - | विपिनम् |
| प्रियसखीमाला | - | जालः |
| तापः | - | अग्निज्वालाकलापः |
| राधा | - | हरिणी |
| कन्दर्पः | - | यमः |
| मलयजपङ्कः | - | विषम् |
| श्वसितपवनः | - | मदनदहनः |
| किसलयतल्पम् | - | हुताशनः। |

**मूल्यनिर्णयसूचिकाः :-**

यद् वस्तु वर्ण्यते तदुपमेयम्। तस्य वर्ण्यं, प्रस्तुतम्, विषयम् इत्यदीनि च नामान्तराणि। येन उपमीयते तदुपमानं तस्य अवर्ण्यम् अप्रस्तुतम् विषयी इत्यादीनि च नामान्तराणि।

## 1.8 आस्वादनटीकालेखनम्।

एकवारं कक्ष्यायां पाठभागम् उच्चैः आलपति। अथवा सूचनासङ्केतानां साहाय्येन शृण्वन्ति छात्राः। तदनन्तरं संघे उपविश्य चर्चां कृत्वा इष्टतमपद्यस्य चयनं कुर्वन्ति। चयनानन्तरं तस्य कारणम् आस्वादनटीकारूपेण लिखन्ति। अध्यापकेन साहाय्यं कार्यम्। काश्चन टीकाः कक्ष्यायां पठन्ति।

आस्वादनटीकायाः मातृका -

इष्टतमं पद्यम्

सरसमसृणमपि मलयजपङ्कं
पश्यति विषमिव वपुषि सशङ्कम्।।

अष्टपद्याम् अयं भागः अतीव हृद्यः भवति। तत्र विरहिणीं राधां वर्णयति। तस्याः विरहस्य तीक्ष्णता द्वित्रैः पदैः अत्र उपवर्णिता भवति। नायिका स्वभावेन स्वदेहे चन्दनलेपं करोति। स्निग्धस्य स्वदेहस्य सौरभ्यं शीतलिमा मसृणता इत्यादीन् प्राप्तुमेव एवं करोति। इह विरहाग्नौ तप्तायाः तस्याः कृते चन्दनं न सुरभि, नापि शीतलः अपि तु विषमयं पश्यति सा। विरहिण्याः तस्याः शरीरे केवलं लेपनमपि सोढुं सा असमर्था जाता इति कार्यम् अनुवाचकान् बोधयितुं कविना उचितानि पदानि स्वीकृतानि। एभिः पदैः तस्याः विरहतीव्रता व्यक्ता भवति। अतः अयं भागः अतीव हृद्यतरः भवति।

## 1.9 तालालयपूर्वकालपनम्।

संघरूपेण उपविशन्ति छात्राः। तदनन्तरं सज्जीकरणाय पञ्चनिमेषं दातव्यम्। तत्समये पाठभागस्य सस्वरालपनाय एव सज्जीकरणः कार्यः। संघरूपेणैव अवतारयन्ति। इतरे संघाः मूल्यनिर्णयं कुर्वन्ति।

**मूल्यनिर्णयसूचिकाः** :- सङ्गीतात्मकता, भावात्मकता, उच्चारणाशुद्धिः।

## 1.10 चाक्रिकारोहणप्रक्रिया।

छात्राः संघेषु उपविशन्ति। पाठभागस्याशयं द्वित्राः वदन्ति। मनुष्यः प्रकृतिश्च अभिन्नौ इति तत्वं, तादृशं चेद् वननशीकरणं एवं प्रकृतिविभवानाम् अमितचूषणं च संभवति वा इति विषये चर्चा कार्या। चर्चानन्तरं प्रतिसङ्घं स्वमतं कक्ष्यायामवतारयति। अध्यापकमूल्यनिर्णयः।

**मूल्यनिर्णयसूचिकाः :-** आशयप्रकटनम्, समर्थनम्, भागभागित्वम्।

# १.२ व्रज हरितम्।

## 2.1 प्रवेशिका।

कथाकथने समर्थः कश्चन छात्रः पक्षिसम्बद्धां एकां कथां वदति। एतादृशी कथाशैली महाभारतेऽपि द्रष्टुं शक्यते इति अध्यापकः क्रोडीकरोति।

## 2.2 गद्यवाचनम्।

कक्ष्यायां कथां वाचयितुं अध्यापकेन प्रयत्नः करणीयः। कठिनपदानि अध्यापकसाहाय्येन सरलतया वाचयन्ति छात्राः। अध्यापकः छात्रान् सङ्घान् कृत्वा भावात्मकतया, सरलतया च वाचयितुं प्रेरयति।

## 2.3 पदच्छेदः/नूतनपदचयनम्।

छात्राः संघे स्थित्वा पाठभागस्थानां सन्धियुक्तपदानां सञ्चित्य पुस्तकसाहाय्येन विश्लेषणं कुर्वन्ति। उच्चैः वाचयन्ति। टिप्पणीपुस्तके लिखन्ति च। नूतनपदानि तदर्थान् चावगम्य प्रवर्तनपुस्तिकायां संयोजयतु। अध्यापकमूल्यनिर्णयः अत्र कार्यः।

## 2.4 भावात्मकतया अवतरणम्।

कथावाचनानन्तरं एकः छात्रः कथाम् अवतारयतु, अध्यापकः छात्रान् संघान् कृत्वा सस्वरवाचनाय प्रेरयति। संघात् एकः आगत्य वाचयतु। अत्र अधिसंघमूल्यनिर्णयाय अवसरः भवति।

## 2.5 कथास्तम्भानां संरचना।

छात्राः संघे स्थित्वा कथां वाचयन्ति। प्रधानकथास्तम्भान् विविच्य, चर्चां कृत्वा, अध्यापकसाहाय्येन दशपरिमितान् कथासन्दर्भान् लिखन्ति। प्रतिसंङ्घमेकः कक्ष्यायाम् अवतारयति। क्रोडीकरणानन्तरं छात्राः स्वस्वप्रक्रियापुस्तिकायां योजयन्ति च। अत्र अधिसंघमूल्यनिर्णयाय अवसरः भवति।

## 2.6 संभाषणरूपेण परिवर्तनम्।

अध्यापकः छात्रान् संघेषु विभजति। पाठसन्दर्भान् संघेषु विभज्य ददाति। संभाषणरूपेण लेखनाय निर्दिशति। छात्राः प्रत्येकं कथांशान् संघे चर्चित्वा लघुसंभाषणरूपेण परिवर्तयति। अध्यापकसाहाय्येन त्रुटीन् संशोध्य संघादेकः कक्ष्यायाम् अवतारयति। अवतरणावसरे इतरे संघाः अधिसघं मूल्यनिर्णयं कुर्वन्ति।

**मूल्यनिर्णयसूचिकाः** :- संभाषणस्य औचित्यम्, समग्रता, भाषासौन्दर्यम्।

## 2.7 टिप्पणीलेखनम्।

छात्राः संघे स्थित्वा पाठभागं समग्रतया पठित्वा, पाठभागस्य आशयान् क्रोडीकरोति। क्रोडीकरणानन्तरं निर्दिष्टाभ्यासरूपेण छात्राः लिखन्ति च। अत्र अध्यापकमूल्यनिर्णयाय अवसरः भवति।

**मूल्यनिर्णयसूचिका :-** आशयव्यक्तता, समग्रता, भाषाशुद्धिः।

**टिप्पण्याः उदाहरणम्।**

आधुनिके लोके सौहृदम् अतिदुर्लभं भवति। सुहृदः भावं सौहृदम्। सु-शोभमं हृत्-हृदयं यस्य सः सुहृद्। भूतदया, मातृपितृभाक्तिः, परस्परस्नेहः इत्यादयः गुणाः यस्मिन् सन्ति स एव सुहृत्। यः अस्मान् पालयति तं प्रति भक्तिः एकः उत्तमः गुणः। यः तं विस्मरति सः कृतघ्नः। अत्र पाठभागे शारिका उत्तमगुणसम्पन्ना भवति। वृक्षा एव ताम् अपालयत्। अतः तं प्रति स्नेहं सा सर्वदा परिपालयति। सम्पत्तौ सौहृदं विपत्तौ त्यागश्च न कार्या इति शारिका जानाति। यद्यपि अन्ये पक्षिणः तं वृक्षमुपेक्ष्य गताः तथापि सौहृदेन शारिका तत्रैव स्थिता। आधुनिकाः एतादृशमनोभावयुक्ताः यदि भवेयुः तार्हि वृद्धसदनादीनि अस्मद्देशात् अपवारयितुं शक्यते।

## 2.8 चर्चा।

छात्राः संघे उपविशन्ति। प्रतिसंघं पाठभागं पठन्ति। 'प्रकृतिप्राणिनां पस्परपूरकत्वं' इति विषयमधिकृत्य चर्चां कुर्वन्ति। परस्परपूरकत्वं सुस्थित्यर्थम् अनिवार्यमिति क्रोडीकरोति च। अत्र अधिसंघमूल्यनिर्णयः भवति।

**मूल्यनिर्णयसूचिकाः :-** अवतारणम्, भागभागित्वम्।

## 2.9 चक्रिकारोहणप्रक्रिया।

छात्राः संघे उपविशन्ति। प्रकृतिवैशिष्ट्यबोधिनीः सूक्तीः अधिकृत्य चर्चां कुर्वन्ति। तदनन्दरं क्रोडीकृत्य लिखन्ति। चार्टपत्रे विलिख्य प्रदर्शयति।

**सूचिका :-**

यथा - मातृदेवो भव।

काले वर्षतु पर्जन्यः, पृथिवी सस्यशालिनी ।

इमाः आपः शिवाः सन्तु।